रुद्रदेवताके ३ धनुर्विद्याभेदे च । "वेदं षडङ्गं वेदाङ्ग-मर्थविद्याश्च मानवीम् । त्रैयम्बकमथेष्वस्त्रमस्त्राणि विविधानि च" भा० द्रो० १७ अ० । ४रुद्रदेवताके बल्यादौ त्रि० "निशायां नैत्यिकं चेदन्तैशं त्रैयम्बकं बलिम्" भा० द्रो० ७९ अ० ।

**त्रैयाहावक** त्रि० त्र्याहावे देशभेदे भवः धूमा० वुञ् । "न य्वाभ्यां पदान्ताभ्यां पूर्वं ताभ्यामैच्" पा० वृद्धिनिषेधात् ऐच् । त्र्याहावदेशभवे ।

**त्रैराशिक** त्रि० त्रीन् राशीन् अधिकृत्य प्रवृत्तम् ठञ् । लीलावत्युक्ते राशित्रयाधिकारेण अनुपातरूपे गणित-भेदे तत्प्रकारश्च क्रमव्यस्तभेदसहितो लीला० उक्तो यथा "त्रैराशिके करणसूत्रं वृत्तम् । प्रमाणमिच्छा च समानजाती आद्यन्तयोस्तः फलमन्यजाति । मध्ये, तदिच्छाहतमाद्यहृत् स्यादिच्छाफलं व्यस्तविधिर्विलोमे । उदाहरणम् । कुङ्कुमस्य सदलं पलद्वयं निष्कसप्त-मलवैस्त्रिभिर्यदि । प्राप्यते सपदि मे वणिग्वर ! ब्रूहि निष्कनवकेन तत्कियत् । न्यासः २/७ । ५/२ । ९/१ । लब्धानि कुङ्कुमपलानि । ५२ । कर्षौ । २ । अपि च प्रकृष्टकर्पूरपलत्रिषष्ट्या चेल्लभ्यते निष्कचतुष्क-युक्तम् । शतं तदा द्वादशभिः सपादैः पलैः किमाचक्ष्व सखे ! विचिन्त्य । न्यासः ६३/१ १०४/१ ४९/४ । इच्छागुणितम्फलम् । ५०९६/४ । छेदभक्तम् । १२७४ । आद्येन । ६३ । हृतं लब्धा निष्काः । २० । शेषम् । १४ । षोडशगुणितम् । २२४ । आद्येन भक्तं जा-तादम्माः । ३ । एवं पणाः । ८ । काकिण्यः । ३ । वराटकाः । ११ । भागाश्च १/९ । पुनश्च । द्रम्मद्वयेन साष्टांशा शालितण्डुलखारिका । लभ्या चेत्-पणसप्तत्या तत्किं सपदि कथ्यताम् । अत्र प्रमाणेच्छयोः सजातीयकरणार्थं द्रम्मद्वयस्य पणीकृतस्य न्यासः ३२/१ । ९/८ । ७०/१ । लब्धे खार्यौ । २ । द्रोणाः । ७ । आढकाः ।१। प्रस्थौ । २ । इति क्रमत्रैराशिकम् । अथ व्यस्तं त्रैराशिकम् । इच्छावृद्धौ फले ह्रासो ह्रासे वृद्धिश्च जायते । व्यस्तं त्रैराशिकं तत्र ज्ञेयं गणित-कोविदैः । यत्र इच्छावृद्धौ फले ह्रासः ह्रासे वा फले वृद्धिस्तत्र व्यस्तं त्रैराशिकं स्यात् । तद्यथा । जीवानां वयसोमौल्ये तौल्ये वर्णस्य हैमनि । भागहारे च राशीनां व्यस्तं त्रैराशिकं भवेत् । जीववयोमूल्ये उदाहरणम् । प्राप्नोति चेत् षोडशवत्सरा स्त्री द्वात्रिं-शतं विंशतिवत्सरा किम् । द्विधूर्वहो निष्कचतुष्कमुक्षा प्राप्नोति धूःषट्कवहस्तदा किम् । न्यासः । १६ ।३२।२०। लब्धं २५/३/५ । द्वितीयन्यासः । २ । ४ । ६ । लब्धं १/१/३ । वर्णोयस्सुवर्णतौल्ये उदाहरणम् । दशवर्णं सुवर्णं चेद्गद्याणकमवाप्यते । निष्केण तिथिवर्णन्तु तदा वद कियन्मितम् । न्यासः १०।१। १५ । लब्धं २३/२/३। राशिभागहरणे उदाहरणम् । सप्ताढकेन मानेन राशौ शस्यस्य मापिते । यदि मानशतं जातं तदा पञ्चाढकेन किम् । न्यासः ७।१०००। ५ । लब्धम् १४०।" "अस्ति त्रैराशिकं वीजं पाटी च विमला मतिः । किमज्ञातं सुबुद्धीनामतो मन्दार्थमुच्यते" लीला० ।

**त्रैरूप्य** न० त्रिरूपस्य भावः ष्यञ् । त्रिधारूपे "चात् यत् तेन त्रैरूप्यम्" सि० कौ० ।

**त्रैलिङ्ग** न० त्रीणि सत्वरजस्तमांसि पुंस्त्रीक्लीवरूपाणि वा लिङ्गान्यस्य, तस्येदम् वा अण् । त्रिलिङ्गप्रधानकार्य्ये । "पुमांश्चैवाऽपुमांश्चैव त्रैलिङ्गं प्राकृतं स्मृतम् । न वा-ऽपुमान् पुमांश्चैव त्रैलिङ्गीत्यभिधीयते" भा०शा०३०७अ० ।

**त्रैलोक्य** न० त्रिलोक्येव स्वार्थे ष्यञ् । स्वर्गमर्त्यपाताल-लोके । "तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम्" मनुः । "त्रैलोक्ये यानि रत्नानि भास्वतं भान्ति ते गृहे" देवीमा० । "प्रस्तुतिं चकमे तस्मिन् त्रैलोक्यप्रभवोऽपि यत्" रघुः । आर्षे तु क्वचित् स्वार्थे अण् । त्रैलोक तत्रार्थे । "तत् प्रेक्ष्य तादृशं रूपं त्रैलोकेनापि दुर्जयम्" भा०शा० २८२ अ० ।

**त्रैलोक्यमोहन** न० त्रैलोक्यं मोहयति मुह–णिच्–ल्यु । तन्त्रोक्ते ताराकवचभेदे । "तारापूजा श्रुता नाथ ! विद्याश्च सकलास्ततः । साम्प्रतं श्रोतुमिच्छामि कवचं मन्त्र-विग्रहम् । त्रैलोक्यमोहनं नाम सर्वापद्विनिवारकम् । पुरैव सूचितं नाथ ! कृपया मे प्रकाशय" भैरव उवाच "देवदानवविद्याध्यक्षपूजिते ! प्राणवल्लभे ! । त्रैलोक्यमो-हनं नाम कवचं श्रूयतां वरम्" । इत्युपक्रम्य दर्शितम् ।

**त्रैलोक्यविजया** स्त्री त्रैलोक्यं विजयते सेवने स्वाधीनं करोति वि+जि–अच् । भङ्गायाम् (भाङ) शब्दच० ।

**त्रैवण** त्रि० त्रिवणस्य वनत्रयस्येदम् शिवा० अण् त्रिवणमस्त्य-स्मिन् सोऽस्यास्तीति उत्करा० छ । त्रैवणीय तद्युक्ते त्रि० ।

**त्रैवणि** स्त्री त्रिवणस्य ऋषेरपत्यम् इञ् । त्रिवणस्यर्षेर-पत्ये । "त्रैवणेस्त्रैवणिः" शत० ब्रा० १४।५।५।२१ ।

**त्रैवर्गिक** त्रि० त्रिवर्गाय हितं वा० ठञ् । १धर्मार्थकाम-